Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 1
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# अव्यापकविषयिताशून्यत्वकल्पः

S. Abhikhya
Research Scholar, N.S.U, Tirupati, India

**Article Info**
Accepted : 10 Jan 2025
Published : 29 Jan 2025
**Publication Issue :**
January-February-2025
Volume 8, Issue 1
**Page Number :** 30-33

**शोधसारांशः-** हेत्वाभाससामान्यनिरूक्तिग्रन्थे हेत्वाभासस्य त्रीणि सामान्यलक्षणानि प्रोक्तानि। तत्र द्वितीयसामान्यलक्षणे अव्यापकविषयिताशून्यत्वकल्पः बहु प्राधान्यं भजते। अतः कल्पस्य सारः अस्मिन् शोधग्रन्थे प्रस्तूयते।

**मुख्यशब्दाः-** अव्यापकः, शून्यत्वकल्पः, जातिमान्, हेत्वाभासः, लक्षणसमन्वयः, शक्यः।

द्वितीयहेत्वाभासस्य लक्षणं भवति – **यद्रूपावच्छिन्नविषयित्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपावच्छिन्नत्वम्** इति। अत्र प्रकृतानुमितिः इत्यनेन प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वे सति प्रकृतसाध्यतावच्छेदकावच्छिन्न- निरूपितव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकानुमितिः ग्राह्या। अस्य लक्षणस्य "ह्रदो वह्निमान् धूमात्" इत्यत्र लक्षणसमन्वयः क्रियते। प्रकृतानुमितिः 'ह्रदो वह्निमान् वह्निव्याप्यधूमवान्' इत्याकारकानुमितिः तादृशानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकता 'ह्रदो वह्निमान्' इत्याकारकबुद्धित्वावच्छिन्न- प्रतिबध्यतानिरूपित 'ह्रदो वह्न्यभाववान्' इत्याकारकनिश्चयत्वावच्छिन्नप्रतिबन्धकता सा वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वव्यापिका भवति, तद्रूपावच्छिन्नत्वं वह्न्यभाववद्ध्रदे अस्तीति लक्षणसमन्वयः।

तथा सति अस्य लक्षणस्य असम्भवः आशङ्कते। कथम् इति चेत् – "ह्रदो वह्निमान् धूमात्" इत्यत्र वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयिता जातित्वेन ह्रदत्वावगाहिनि जातिमान् वह्न्यभाववान् इत्याकारकज्ञानेऽपि वर्तते। तत्र प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता नास्तीति असम्भवः। यतः निरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताकविशेष्यताकां 'ह्रदो वह्निमान्' इत्याकारकानुमितिं प्रति निरवच्छिन्नह्रदत्वनिष्ठावच्छेदकताकविशेष्यताकस्य 'ह्रदो वह्न्यभाववान्' इत्यकारकनिश्चयस्य प्रतिबन्धकत्वात्।

एवं "धूमवान् वह्नेः" इत्यत्र जातित्वादिना वह्नित्वावगाहि जातिमान् धूमाभाववद्वृत्तिरित्याकारकज्ञाने धूमाभाववद्वृत्तित्वविशिष्टवह्नित्वावच्छिन्न-विषयितायाः सत्वेऽपि प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः असत्वात् असम्भवैव।

एतादृशासम्भववारणाय लक्ष्यतावच्छेदकत्वेनाभिमतयद्रूपावच्छिन्न- विषयकनिश्चये पक्षतावच्छेदकांशे अन्याप्रकारकत्वं[1] विवक्षणीयम्। तच्च पक्षतावच्छेदकनिष्ठविषयतानिरूपितप्रकारताशून्यत्वरूपं तथा च नासम्भवः।

1. सामान्यनिरूक्तिगादाधर्याम् – पृ.सं. – 106

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितजातित्वनिष्ठप्रकारताशून्यत्वस्य जातित्वेन ह्रदत्वावगाहि जातिमान् वह्न्यभाववान् इति निश्चये विरहेण तादृशनिश्चयस्य यद्रूपावच्छिन्नविषयकनिश्चयपदेन धारणायोगात् वह्न्यभाववद्ध्रदविषयकवह्न्यभाववान् ह्रद इत्याकारकनिश्चयस्यैव तादृशनिश्चयपदेन धर्तुं शक्यतया लक्षणसमन्वयसम्भवात् नासम्भवः।

असम्भववारणेऽपि "जलवान् वह्निमान्" इत्यनुमितौ वह्न्यभाववज्जलवद्रूपबाधे अव्याप्तिप्रसङ्गः। यतः जलवान् वह्न्यभाववान् इत्याकारकनिश्चये वह्न्यभाववज्जलावच्छिन्नविषयतानिरूपितविषयितायाः सत्वेऽपि पक्षतावच्छेदकनिष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वविरहात् निश्चयपदेन निश्चयोऽयं ग्रहीतुमशक्यत्वात् अव्याप्तिः। अस्मिन् निश्चये **जात्यतिरिक्ताऽखण्डोपाधीनां किञ्चिद्रूपेण भानमिति नियमात्** पक्षतावच्छेदकीभूतजलनिष्ठविशेष्यतानिरूपित- जलत्वनिष्ठप्रकारतायाः एव सत्वात् अव्याप्तिरिति भावः। एवं "ह्रदो वह्निमान् ह्रदत्वात्" इत्याकारकानुमितौ वह्न्यभाववद्वृत्तिह्रदत्वरूपव्यभिचारविषयकनिश्चये अव्याप्तिः। पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपितह्रदत्वनिष्ठविशेषणताशून्यत्वविरहेण [2] यद्रूपपदेन वह्न्यभाववद्वृत्तित्वविशिष्टह्रदत्वस्य धर्तुमशक्यत्वादव्याप्तिः।

अतो उभयत्राव्याप्तिवारणाय निश्चये अवच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकपक्षतावच्छेदकत्वाभाववद्धर्मनिष्ठप्रकारता-निरूपितपक्षतावच्छेदकनिष्ठविशेष्यताशून्यत्वं निवेश्यते। तदा लक्षणमित्थं भवति।

**अवच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकपक्षतावच्छेदकत्वाभाववद्धर्मनिष्ठप्रकारतानिरूपितपक्षतावच्छेदकनिष्ठविशेष्यताशून्यानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चय- वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यता- निरूपितप्रतिबन्धकता तद्रूपावच्छिन्नत्वमिति।** तथा सति – "जलवान् वह्निमान् धूमात्" इत्यस्मिन् स्थले अवच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताक-पक्षतावच्छेदकत्वाभाववद्धर्मः इत्युक्ते जलत्वं न भवति किन्तु द्रव्यत्वादिकं तन्निष्ठप्रकारतनिरूपितविशेष्यताशून्यत्वं वह्न्यभाववज्जलवद्रूपबाधविषयकनिश्चये अस्ति। तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयिताव्यापिका जलवान् वह्निमान् वह्निव्याप्यधूमवान्श्च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता भवतीति लक्षणसमन्वयात् नाव्याप्तिः।

एवं "ह्रदो वह्निमान् ह्रदत्वात्" इत्यत्र अवच्छेदकत्वसम्बन्धावच्छिन्नपक्षतावच्छेदकत्वाभाववान् यो धर्मः इत्युक्ते न ह्रदत्वत्वम् अपि तु द्रव्यत्वादिकमेव, तन्निष्ठप्रकारतानिरूपितविशेष्यताशून्यनिश्चयः ह्रदत्वं वह्न्यभाववद्वृति इत्याकारकनिश्चयः भवतीति नाव्याप्तिः।

एवं सत्यपि पुनः "ह्रदो वह्निमान् ह्रदत्वात्" इत्यत्राव्याप्तिर्भवति। तत्र हेतोः ह्रदत्वस्य उल्लिख्यमानतया ह्रदत्वत्वेनैव भानात्। वह्न्यभाववद्वृत्तिह्रदत्वम् इति व्यभिचारनिश्चये पक्षतावच्छेदकीभूतह्रदत्वनिष्ठविशेष्यतानिरूपित- ह्रदत्वत्वनिष्ठप्रकारत्वानिरूपकत्वविरहात् अव्याप्तिः। अतः पक्षतावच्छेदकांशे अन्याप्रकारकत्वनिवेशो न युक्तः इति भावः।

अत एतादृशस्थलेषु अव्याप्तिवारणार्थं निश्चये दोषपदार्थाघटकपदार्थाविषयकत्वं विशेषणं देयम्। तथा सति "ह्रदो वह्निमान् धूमात्" इत्यत्र असम्भवः वारयितुं शक्यः। तथा हि दोषपदार्थाघटकपदार्थः जातित्वादिकं तदविषयकत्वं ह्रदः वह्न्यभाववान् इत्याकारकनिश्चये वर्तते। तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्न- विषयतानिरूपितविषयिताव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता ह्रदो वह्न्यभाववान् इत्याकारकनिश्चयनिष्ठा प्रतिबन्धकता, तद्रूपवत्वं वह्न्यभाववद्ध्रदे अस्तीति समन्वयात् नासम्भवः।

---

[2]. उल्लिख्यमानजातेः स्वरूपतो न भानं किन्तु किञ्चिद्रूपेणैवेति नियमेन।

एवं “जलवान् वह्निमान् धूमात्” इत्याकारकस्थले वह्न्यभाववज्जलवद्रूपबाधे समन्वयः भवति। दोषपदार्थाघटकपदार्थः जातित्वादिकं तदविषयकनिश्चयः जलवान् वह्न्यभाववान् इत्याकारकनिश्चयः, तादृशनिश्चयनिष्ठयद्रूपावच्छिन्नविषयिताव्यापिका या जलवान् वह्निमान् वह्निव्याप्यधूमवान्श्च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपावच्छिन्नत्वं वह्न्यभाववज्जलवद्रूपबाधे अस्तीति लक्षणसमन्वयः। एवं “ह्रदो वह्निमान् ह्रदत्वात्” इत्यत्र वह्न्यभाववद्वृत्तिह्रदत्वरूपव्यभिचारे समन्वयो भवति। दोषपदार्थाघटकपदार्थः जलत्वादिकं तदविषयकत्वं ह्रदत्वं वह्न्यभाववद्वृत्ति इत्याकारकनिश्चये अस्ति, तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपं वह्न्यभाववद्वृत्तिह्रदत्वं तद्रूपावच्छिन्नत्वं वह्न्यभाववद्वृत्तिह्रदे अस्तीति समन्वयः। त्रिषु स्थलेषु दोषवारणसम्भवेऽपि “सर्वं गगनवत् प्रमेयत्वात्” इत्यत्र गगनाभाववत्सर्वरूपबाधे अव्याप्तिः आकाशाभाववत्सर्वरूपबाधाघटकस्याप्रसिद्धत्वात्।

अव्याप्तिवारणार्थं **यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताभिन्नकिञ्चिदवच्छिन्नविषयताशून्यत्वं निश्चये निवेशनीयम्।** “ह्रदो वह्निमान् धूमात्” इत्यत्र वह्न्यभाववद्ध्रदे लक्षणसमन्वयः क्रियते – यद्रूपावच्छिन्नस्य यस्य यस्य वह्नित्वावच्छिन्नस्य वह्नेः, अभावत्वावच्छिन्नस्याभावस्य, ह्रदत्वावच्छिन्नस्य ह्रदस्य तादृशविशिष्टघटकता वह्न्यभाववद्ध्रदात्मकदोषघटकता, तत्तद्रूपावच्छिन्ना या तत्तन्निष्ठविषयता वह्नित्वावच्छिन्ना वह्निनिष्ठा विषयता, अभावत्वावच्छिन्ना अभावनिष्ठा विषयता, ह्रदत्वावच्छिन्ना ह्रदनिष्ठा विषयता, तद्भिन्ना या किञ्चिदवच्छिन्नविषयता जातित्वावच्छिन्ना ह्रदत्वनिष्ठा विषयता तच्छून्यत्वस्य वह्न्यभाववद्ध्रदे सत्वात् लक्षणसमन्वयः एवं जातिमान् वह्न्यभाववान् इति ज्ञानमादाय असम्भवोऽपि नास्ति।

“सर्वं गगनवत् प्रमेयत्वात्” इत्यत्र गगनाभाववत्सर्वरूपबाधेऽपि नाव्याप्तिः। तथा हि – गगनत्वावच्छिन्नस्य गगनस्य अभावत्वावच्छिन्नस्य अभावस्य सर्वत्वावच्छिन्नस्य सर्वस्य गगनाभाववत्सर्वरूपदोषघटकता अस्ति। तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयता गगनत्वावच्छिन्नविषयता, अभावत्वावच्छिन्नविषयता, सर्वत्वावच्छिन्नविषयता। तादृशविषयताभेदविषयता घटत्वाद्यवच्छिन्नविषयता, तादृशविषयताशून्यनिश्चयः सर्वं गगनाभाववत् इत्याकारकनिश्चयः, तादृशनिश्चयवृत्तित्वविशिष्ट– गगनाभाववत्सर्वत्वावच्छिन्नविषयतानिरूपितविषयित्वव्यापकप्रतिबध्यतानिरूपित प्रतिबन्धकता गगनाभाववत्सर्वत्वावच्छिन्नप्रतिबन्धकता भवतीति नाव्याप्तिः अतो इदं लक्षणं समीचीनम् इति ।

तथा सत्यपि “ह्रदः जात्यभाववान् जलात्” इत्यत्र जातिमद्ध्रदादिरूपबाधे अव्याप्तिः। यतः जातित्वावच्छिन्नह्रदत्वस्य जातिमद्ध्रदात्मकविशिष्टघटकत्वात् जातित्वावच्छिन्नजातिनिष्टविषयताभिन्ना या विषयता इत्युक्तौ सा घटत्वावच्छिन्नविषयता, न तु जातित्वावच्छिन्नजातिनिष्ठविषयता, स्वस्मिन् स्वभेदस्य असत्वात्। तादृशघटत्वावच्छिन्नविषयताशून्यत्वं यथा ह्रदः जातिमान् इति निश्चये वर्तते तथा जातिमान् जातिमान् इत्याकारकनिश्चयेऽपि वर्तते। किन्तु तादृशनिश्चये प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता नास्तीति अव्याप्तिः इति चेत्–

अत्रोच्यते – यद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यत्वं निवेशनीयम्। तथा सति लक्षणम् इत्थं भवति – **यद्रूपावच्छिन्नविषयतानिरूपितविषयितात्वं यद्रूपावच्छिन्नविषयतानिरूपितविषयिता-समानाधिकरणाभावीयप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयतानिरूपितविषयिता –**

**शून्यानाहार्याप्रामाण्यानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्ननिरूपकताक- विषयताव्यापिका**

**प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपावच्छिन्नत्वमिति।** तदा “ह्रदो वह्निमान् धूमात्” इत्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः क्रियते। वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतानिरूपित– विषयितासमानाधिकरणः यः अभावः वह्न्यभाववज्जातिमत्वावच्छिन्न– विषयतानिरूपितविषयित्वं नास्ति इत्याकारकप्रतीतिसिद्धाभावः। तादृशाभावप्रतियोगितावच्छेदकं यद्रूपभूतवह्न्यभाववज्जातिमत्वावच्छिन्न– विषयतानिरूपितविषयितात्वं भवति। तद्रूपभूतं यत् वह्न्यभाववज्जातिमत्वं तदवच्छिन्नविषयतानिरूपितविषयिताशून्यः यः निश्चयः जातिमान्

वह्न्यभाववान् इत्याकारको न भवति अपि तु ह्रदो वह्न्यभाववान् इत्याकारकनिश्चयः। तादृशनिश्चयविशिष्टयद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितित्वव्यापक- प्रतिबध्यतानिरूपितप्रतिबन्धकता ह्रदो वह्न्यभाववान् इत्याकारकनिश्चयत्वावच्छिन्न- प्रतिबन्धकता भवति तद्रूपवत्वं वह्न्यभाववद्ध्रदे अस्तीति लक्षणसमन्वयः।

अत्रैव जातिमान् वह्न्यभाववान् इति ज्ञानमादाय असम्भवोपि नास्ति। तथा हि - जातित्वावच्छिन्नह्रदत्वविषयितात्वं वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिता- समानाधिकरणाभावप्रतियोगितावच्छेदकं भवति। वह्न्यभाववद्ध्रदत्वावच्छिन्न- विषयित्वाधिकरणे ह्रदो वह्न्यभाववान् इति ज्ञाने जातित्वावच्छिन्नह्रदत्वविषयिता नास्ति वह्न्यभाववज्जातिमत्वावच्छिन्नविषयिता नास्तीति प्रतीतिसिद्धाभावः भवति, तदीय प्रतियोगितावच्छेदकत्वस्य जातित्वावच्छिन्नह्रदत्वविषयितात्वे, वह्न्यभाववज्जातिमत्वावच्छिन्नविषयितात्वे च वर्तते। अतः तादृशजातित्वावच्छिन्नह्रदत्वविषयिताशून्यत्वं वह्न्यभाववज्जातिमत्वावच्छिन्न- विषयिताशून्यत्वं च जातिमान् वह्न्यभाववान् इति निश्चये नास्ति, किन्तु ह्रदो वह्न्यभाववान् इत्याकारकनिश्चये अस्ति। तादृशनिश्चयीयवह्न्यभाववद्ध्रदत्वावच्छिन्न- विषयिताव्यापकत्वस्य प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां सत्वात् नासम्भवः लक्षणसमन्वयश्च।

एवं "ह्रदो जात्यभाववान्" इत्यत्र जातिमान् जातिमान् इति ज्ञानमादाय नाव्याप्तिः। जातिमद्ध्रदत्वावच्छिन्नविषयतानिरूपितविषयिताधिकरणे ह्रदः जातिमान् इत्याकारकनिश्चये वर्तमानः यः अभावः इत्युक्तौ जातिमज्जातिमत्वावच्छिन्नविषयतानिरूपितविषयिता नास्तीति प्रतीतिसिद्धाभावः भवति। तादृशाभावप्रतियोगितावच्छेदकं यद्रूपभूतजातिमज्जातिमत्वावच्छिन्न- विषयतानिरूपितविषयितात्वं भवति। तद्रूपं यत् जातिमज्जातिमत्वं तदवच्छिन्नविषयितानिरूपितविषयिताशून्यः यः निश्चयः न हि जातिमन् जातिमान् इत्याकारकः अपि तु ह्रदो जातिमान् इत्याकारकः भवति। तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयतानिरूपितविषयिताव्यापकत्वं प्रकृतानुमितिः ह्रदो जात्यभाववान् जात्यभावव्याप्यजलवान्श्च इत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायां सत्वात्, तद्रूपवत्वं जातिमद्ध्रदत्वरूपाबाधे लक्षणसमन्वयात् नाव्याप्तिः।

**उपसंहारः** – एवं प्रकारेण अव्यापकविषयिताशून्यज्ञानीयत्वस्य लक्षणे निवेशनम् आवश्यकम् इति भावः।

## संदर्भग्रन्थसूची-


1. गादाधरीसामान्यनिरुक्ति, चौखम्भा संस्कृतभवन, वाराणसी, 2019.
2. Samanyanirukti of Gangeshopadhyaya, Mithila Institute of Post-graduate Studies and Research in Sanskrit learning, Darbhanga, 1970.